श्री आर्तत्राणपरायण नारायण स्तोत्रं

श्री आर्तत्राणपरायण नारायण स्तोत्रं

प्रह्लाद प्रभुरस्ति चेत्तव हरिः सर्वत्र मे दर्शय
स्तंभे चैनमिति ब्रुवंतमसुरं तत्राविरासीद्धरिः |
वक्षस्तस्य विदारयन्निजनखैर्वात्सल्यमावेदय-
-न्नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 1 ||

श्रीरामात्र विभीषणोऽयमधुना त्वार्तो भयादागतः
सुग्रीवानय पालयेऽहमधुना पौलस्त्यमेवागतं |
एवं योऽभयमस्य सर्वविदितं लंकाधिपत्यं ददा-
-वार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 2 ||

नक्रग्रस्तपदं समुद्यतकरं ब्रह्मेश देवेश मां
पाहीति प्रचुरार्तरावकरिणं देवेश शक्तीश च |
मा शोचेति ररक्ष नक्रवदनांचक्रश्रिया तत्क्षणा-
-दार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 3 ||

हा कृष्णाच्युत हा कृपाजलनिधे हा पांडवानां गते
क्वासि क्वासि सुयोधनादवगतां हा रक्ष मां द्रौपदीं |
इत्युक्तोऽक्षयवस्त्ररक्षिततनुं योरक्षदापद्गणा-
-दार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 4 ||

यत्पादाब्जनखोदकं त्रिजगतां पापौघविध्वसनं
यन्नामामृतपूरणं च पिबतां संतापसंहारकं |
पाषाणश्च यदंघ्रितो निजवधूरूपं मुनेराप्तवा-
-नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 5 ||

यन्नामश्रुतिमात्रतोऽपरिमितं संसारवारान्निधिं
त्यक्त्वा गच्छति दुर्जनोऽपि परमं विष्णोः पदं शाश्वतं |
तन्नैवाद्भुतकारणं त्रिजगतां नाथस्य दासोऽस्म्यह-
-मार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 6 ||

पित्रा भ्रातरमुत्तमांकगमितं भक्तोत्तमं यो ध्रुवं
दृष्ट्वा तत्सममारुरुक्षुमुदितं मात्रावमानं गतं |
योऽदात् तं शरणागतं तु तपसा हेमाद्रिसिंहासनं
ह्यार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 7 ||

नाथेति श्रुतयो न तत्त्वमतयो घोषस्थिता गोपिका
जारिण्यः कुलजातिधर्मविमुखा अध्यात्मभावं ययुः |
भक्तिर्यस्य ददाति मुक्तिमतुलां जारस्य यः सद्गति-
-ह्यार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 8 ||

क्षुत्तृष्णार्तसहस्रशिष्यसहितं दुर्वाससं क्षोभितं
द्रौपद्या भयभक्तियुक्तमनसा शाकं स्वहस्तार्पितं |
भुक्त्वा तर्पयदात्मवृत्तिमखिलामावेदयन् यः पुमा-
-नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 9 ||

येनाराक्षि रघूत्तमेन जलधेस्तीरे दशास्यानुज-
-स्त्वायातं शरणं रघूत्तम विभो रक्षातुरं मामिति |
पौलस्त्येन निराकृतोऽथ सदसि भ्रात्रा च लंकापुरे
ह्यार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 10 ||

येनावाहि महाहवे वसुमती संवर्तकाले महा-
-लीलाक्रोडवपुर्धरेण हरिणा नारायणेन स्वयं |
यः पापिद्रुमसंप्रवर्तमचिराद्धत्त्वा च योऽगात् प्रिया-
-मार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 11 ||

योद्धासौ भुवनत्रये मधुपतिर्भर्ता नराणां बले
राधाया अकरोद्रते रतिमनःपूर्तिं सुरेंद्रानुजः |
यो वा रक्षति दीनपांडुतनयान्नाथेति भीतिं गता-
-नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 12 ||

यः सांदीपिनिदेशतश्च तनयं लोकांतरात् सन्नतं
चानीय प्रतिपाद्य पुत्रमरणादुज्जृंभमाणार्तये |
संतोषं जनयन्नमेयमहिमा पुत्रार्थसंपादना-
-दार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 13 ||

यन्नामस्मरणादघौघसहितो विप्रः पुराऽजामिलः
प्राणान्मुक्तिमशेषितामनु च यः पापौघतापार्तियुक् |
सद्यो भागवतोत्तमात्मनि मतिं प्रापांबरीषाभिध-
-श्चार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 14 ||

योरक्षद्वसनादिनित्यरहितं विप्रं कुचैलाभिधं
दीनादीनचकोरपालनपरः श्रीशंखचक्रोज्ज्वलः |
तज्जीर्णांबरमुष्टिपात्रपृथुकानादाय भुक्त्वा क्षणा-
-दार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 15 ||

यत्कल्याणगुणाभिराममममलं मंत्राणि संशिक्षते
यत्संशेतिपतिप्रतिष्ठितमिदं विश्वं वदत्यागमः |
यो योगींद्रमनःसरोरुहतमःप्रध्वंसविद्भानुमा-
-नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 16 ||

काळिंदीहृदयाभिरामपुलिने पुण्ये जगन्मंगळे
चंद्रांभोजवटे पुटे परिसरे धात्रा समाराधिते |
श्रीरंगे भुजगेंद्रभोगशयने शेते सदा यः पुमा-
-नार्तत्राणपरायणः स भगवान् नारायणो मे गतिः || 17 ||

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणा-
-दौदार्यादघशोषणादगणितश्रेयः पदप्रापणात् |
सेव्यःश्रीपतिरेव सर्वजगतामेते हि तत्साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पांचाल्यहल्याध्रुवः || 18 ||

इति श्रीमच्छंकराचार्य विरचितं श्री आर्तत्राणपरायण नारायण स्तोत्रं ||